International Journal of Sanskrit Research 2016; 2(2): 76-80

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(2): 76-80
© 2016 IJSR
www.anantaajournal.com
Received: 17-01-2016
Accepted: 24-02-2016

**डा. नृसिंहनाथगुरुः**
सहायकाचार्यः, साहित्यविभागः
कलियाचक-विक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालयः
हेरिया, पूर्वमेदनीपुरम्, पश्चिमबङ्ग,
भारत

**Correspondence**
**डा. नृसिंहनाथगुरुः**
सहायकाचार्यः, साहित्यविभागः
कलियाचक-विक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालयः
हेरिया, पूर्वमेदनीपुरम्, पश्चिमबङ्ग,
भारत

# लक्षणाशक्तिविचार

## डा. नृसिंहनाथगुरु

**प्रस्तावना**

शब्दश्रवणात् अर्थप्रतीतिः भवतीति भाषाविदां सिद्धान्तः। शब्दात् अर्थस्य ज्ञानं शक्तिमाध्यमेन भवति। यदि शब्देषु शक्तिः न स्यात् तर्हि अर्थबोधो नैव स्यात्। यदुक्तं भर्त्तृहरिणा –

"विषयत्वमनापन्नैः शब्दैर्नार्थः प्रकाशते।
न सत्तयैव तेऽर्थानामगृहीताः प्रकाशकाः॥ "[i]

विषयत्वमनापन्नैः प्राप्ता एव शब्दा अर्थबोधनक्षमाः भवन्ति। यथा महाभाष्ये उच्यते –

"शब्द उलब्धोऽर्थं प्रत्याययति न सत्तामात्रेण॥ "[ii]

शब्दशक्तिप्रकाशिकायां यथा जगदीशः –

"वाक्यभावनाप्तस्य सार्थकस्यावबोधतः।
सम्पद्यते शाब्दबोधो न तन्मात्रस्य बोधतः॥ "[iii]

अथ का नाम शक्तिः इति जिज्ञासायां शकिधातोः स्त्रियां क्तिन् इति प्रत्ययेन शक्तिपदं निष्पद्यते। नाशेनोच्यते –

"शब्दार्थयोस्तादात्म्यमेव शक्तिः॥ "[iv]

**अपि च परमलघुमञ्जुषायां नागेशः कथयति –**

"अस्मात् पदादयमर्थो बोद्धव्यः इत्याकारा इदं पदं इममर्थं बोधयतु इत्याकारा वेश्वरेच्छा शक्तिः। "

**वाक्यपदीये यथा –**

"तस्य प्राणे च या शक्तिर्या च बुद्धौ व्यवस्थिता।
विवर्तमाना स्थानेषु सैषा भेदं प्रपद्यते॥ "[v]

"शब्दः प्राणाधिष्ठानो बुद्ध्यधिष्ठानश्च। द्वाभ्यां प्राणबुद्धिशक्तिभ्याम् अभिव्यक्तोऽर्थं प्रत्याययति। "[vi]

व्याकरण – मीमांसा – तर्कादिशास्त्रे शब्दशक्तिविचारः सूक्ष्मातिसूक्ष्मरीत्या विद्यते। वैयाकरणाः मीमांसकाः नैयायिकाश्च अभिधा तात्पर्या लक्षणा चेति तिस्रः शब्दशक्तयः स्वीकृताः। प्राचीनैः आलङ्कारिकैरपि इमाः एव शब्दशक्तयः स्वीकृताः। परन्तु अलङ्कारशास्त्रपरम्परायां ध्वनिसिद्धान्तस्य परिप्रकाशानन्तरं व्यञ्जनाशक्तिः स्वीक्रियते।
साहित्यिकाः शब्दः त्रिविधः इति स्वीकुर्वन्ति। यथा वाचकः, लाक्षणिकः, व्यञ्जकश्च। यदुक्तं मम्मटेन –

"स्याद् वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकत्रिधा। "[vii]

प्रत्येकस्य शब्दस्य अर्थः विद्यते अतः अर्थः अपि वाच्यलक्ष्यव्यङ्ग्यभेदेन त्रिविधः। तद्यथा –

"वाच्यादयस्तदर्थाः स्युः। "[viii]

**विश्वनाथेनापि उक्तमस्ति –**

"अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मतः। "[ix]

शब्दात् अर्थस्य प्रतीतिः शक्तिमाध्यमेन भवति। अतः शक्तिरपि त्रिविधा। तद्यथा – अभिधा, लक्षणा, व्यञ्जना इति। वाचकशब्दात् वाच्यार्थस्य प्रतीतिः अभिधाशक्त्या, लाक्षणिकशब्दात् लक्ष्योऽर्थस्य प्रतीतिः लक्षणाशक्त्या एवञ्च व्यञ्जकशब्दात् व्यङ्ग्यार्थस्य प्रतीतिः व्यञ्जनाशक्त्या भवति। यदुक्तं विश्वनाथेन –

"वाच्योर्थोऽभिधया बोध्यो लक्ष्योलक्षणया मतः।
व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः॥ "[x]

लक्षणा – का नाम लक्षणेति जिज्ञासायामालङ्कारिकाः लक्षणायाः लक्षणमेवं प्रतिपादितवन्तः। तद्यथा
काव्यप्रकाशकारेण मम्मटाचार्येण -

"मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
अन्योऽर्थः लक्ष्यते यत्सा लक्षणारोपिता क्रिया॥ "[xi]

**यदुक्तं विश्वनाथेन –**

"मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते।
रूढेः प्रयोजनाद्वाऽसौ लक्षणा शक्तिरर्पिता॥ "[xii]

अत्र लक्षणायाः कृते हेतुत्रयमावश्यकम्। १. मुख्यार्थस्य बाधः, २. मुख्यार्थस्य योगः, ३. रूढिप्रयोजनयोरेकस्य सम्बन्धः। उदाहरणं यथा – गङ्गायां घोषः परन्तु गङ्गायां घोषः इत्यत्र गङ्गाशब्दस्य मुख्योऽर्थो भवति जलप्रवाहः। तत्र घोषस्य निर्माणं न सम्भवति। अतः मुख्यार्थस्य बाधो जातः। सूत्रस्थ तद्योगे इत्यंशे शङ्का जायते, यत्र मुख्यार्थस्य बाधः तत्र तस्य योगः कथमिति। उत्तरेण उच्यते सम्बन्धयोगात् अर्थात् तत्सम्बन्धिनः कस्यचिदर्थस्य योगः अनिवार्यः नोचेत् गङ्गायां घोषः इति स्थाने यमुनायां घोषरिति अर्थः भवेत्। अतः तद्योगे इति मुख्यार्थसम्बन्धिनः कश्चन अर्थः व्यवहर्तव्यः। एवञ्च रूढिप्रयोजनयोरेकस्यावश्यकतापेक्षते। गङ्गायां

घोष इति कथनेन शीतत्वपावनत्वादीनां धर्माणां प्रतीतिः प्रयोजनम्। एतस्य हेतुत्रयस्य योगात् गङ्गायां घोष इति वाक्यात् गङ्गतटे घोष इति अर्थः लक्ष्यते। यया शक्त्या अयम् अर्थो बुध्यते सा शक्तिर्लक्षणा। लक्षणया प्रतिपाद्यार्थो लक्ष्यार्थः। आरोपिता क्रिया इति कथनेन गङ्गायां तटस्यारोपणार्थः आयाति।

प्राचीनानां नैयायिकानां मतेन अन्वयानुपपत्तिः मुख्यार्थबाधः, नव्यनैयायिकानां मतेन च तात्पर्यानुपपत्तिरेव मुख्यार्थबाधः। अत्र विदुषां द्वितीयमतं प्रति आग्रहः अधिकतया परिलक्ष्यते। यदि मुख्यार्थबाधस्य अर्थास्यान्वयानुपत्तिरिति स्वीक्रियते तदा काकेभ्यो दधि रक्ष्यताम् इत्यत्र लक्षणा न स्यात्।

एवञ्च रूढिः प्रयोजनं चेति लक्षणायाः भेदकं तत्त्वद्वयम्। कर्मणि कुशलः इत्यत्र कुशलशब्दस्य व्युत्पत्तिलभ्यः अर्थो भवति कुलान् लाति आदत्ते इति। तत् विवेकचत्वादि सम्बन्धात् रूढितः कुशलशब्दस्य दक्षरूपोऽर्थो ज्ञायते।

मम्मटेन लक्षणायाः षड्भेदाः प्रतिपादिताः। आदौ लक्षणा द्विविधा शुद्धा गौणी चेति। शुद्धा द्विविधा – उपादानलक्षणा, लक्षणलक्षणा चेति।

"स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम्।
उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा॥ "[xiii]

स्वसिद्धये परस्य आक्षेपणं यत्र भवति तत्र उपादानलक्षणा भवति। एवञ्च परार्थं यत्र स्वस्यार्पणं भवति तत्र लक्षणलक्षणा भवति। तेऽपि द्विविधे सारोपा साध्यवसाना चेति। उक्तं यत् –

"सारोपान्यातु यत्रोक्तौ विषयी विषयस्तथा।
विषय्यन्तः कृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका॥ "[xiv]

यत्र विषयी विषयः समानाधिकरण्येन वर्तते, तत्र सारोपालक्षणा भवति। यथा गर्दभो बालकः। अत्र विषयी गर्दभः तथा विषयो बालकः। एवञ्च यत्र विषयिद्वारेण विषयस्य निगरणं भवति तत्र साध्यवसाना लक्षणा भवति। उदाहरणं यथा – गर्दभोऽयम्, अत्र अयं पदेन विषयः बालकः स्वतन्त्रतया स्वशब्देन अनुक्तः सन् गर्दभशब्देन निर्गीणः सन् उच्यते।

साहित्यदर्पणकारस्य विश्वनाथस्य मतानुसारं लक्षणा आशीतिप्रकारा भवति। आदौ सा द्विविधा – उपादानलक्षणा, लक्षणलक्षणा च। यत्र स्वार्थसिद्धये पराक्षेपो भवति, आत्मनश्चापि उपादानं भवति, तत्रोपादानलक्षणा। तद्यथा –

"मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये।
स्यादात्मनोऽप्युपादानादोषोपादानलक्षणा॥ "[xv]

इयमेव अजसत्स्वर्था इत्यपि उच्यते। रूढौ उपादानलक्षणा यथा – श्वेतो धावति। अत्र श्वेतशब्दः श्वेतगुणत्वविशिष्टम् अश्वं बोधयति। अत्र रूढिः कारणम्। प्रयोजनवती उपादानलक्षणा यथा – कुन्ताः प्रविशन्ति, यष्टयः प्रविशन्ति। अत्र कुन्तादि शब्देन कुन्तादिधारिणः पुरुषाः लक्ष्यन्ते। अतः अत्र स्वार्थग्रहणाद् उपादानलक्षणा। कुन्तादिशब्दैर्भयजनकत्वादिकं प्रयोजनम्, तेन प्रयोजनवती।

यत्र परस्यान्वयसिद्धये स्वकीयोऽर्थः त्यज्यते तत्र लक्षणलक्षणा भवति। यथा –

"अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये।
उपलक्षणहेतुत्वादेषा लक्षणलक्षणा॥ "[xvi]

**इयमेव जहत्स्वार्थाऽप्युच्यते। यथा –**

उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्।
विदधतीदृशमेव सदा सखे सुखितमास्व ततः शरदां शतम्॥ [xvii]

अपकारिणं प्रति उपकारादिप्रतिपादनात् मुख्यार्थबाधः, अपकारातिशयादिरूपो विपरीतोऽर्थेऽत्र गृह्यते।

एवं चतुर्विधा लक्षणा पुनः द्विधा सारोपा, साध्यवसाना च। यत्र विपयोऽनिर्गीर्णोऽन्येन सह तादात्म्यं स्थापयति, तत्र सारोपा लक्षणा। यत्र च विषयो निगीर्णः तादात्म्यरूपो वा विषयिणा भवति तत्र साध्यवसाना लक्षणा भवति। यथा गौर्वाहीकः। अत्र वाहीकदेशस्थपुरुषे गोत्वं पशुत्वं मूर्खत्वं वा लक्ष्यते। अत्र पुरुषे गोत्वारोपात् सारोपा लक्षणा।

यत्र विषयो विषयिणा निगीर्यते एकात्मतां वा गच्छति, तत्र साध्यवसाना लक्षणा। यथा – गौरियम्, गौर्जल्पति वा। अत्र गौ शब्देन वाहीकदेशस्थः पुरुषो लक्ष्यते। तस्य अनुल्लेखात् साध्यवसाना लक्षणा।

पुनः सा द्विधा शुद्धा, गौणी च। यत्र सादृश्यभिन्ना सा शुद्धा। या च सादृश्यमूला सा गौणी। आयुर्घृतम्, श्वेतो धावति, कर्मणि कुशलः, कुन्ताः प्रविशन्ति, इत्यत्र सादृश्येतर सम्बन्धमूला लक्षणा अतः शुद्धा। यत्र च सादृश्यमूला सा गौणी। यथा – पुरुषः सिंह, गौर्वाहीकः, गौर्जल्पति, तैलानि हेमन्ते सुखानि, राजा गौडेन्द्रं कण्टकं शोधयति, अत्र सादृश्यमूलत्वाद् गौणी लक्षणा।

एवमष्टप्रकारकी रूढिवती लक्षणा, अष्टप्रकारकी प्रयोजनवती लक्षणा। तत्र प्रयोजनवतीलक्षणा पुनः द्विधा गूढागूढत्वेन। पुनः षोडशप्रकारा लक्षणा द्विधा धर्मिधर्मभेदेन। एवं प्रकारेण प्रयोजनवतीलक्षणा द्वात्रिंशत् प्रकारा तथा च रूढिवतीलक्षणा अष्टप्रकारा आहत्य लक्षणा चत्वारिंशत् प्रकारा भवति। पुनश्च सा पदगत – वाक्यगतभेदेन द्विधा। तद्यथा –

"तदेव लक्षणाभेदाश्चत्वारिंशन्मता बुधैः।
पदवाक्यगतत्वेन प्रत्येकं ता अपि द्विधा॥ "[xviii]

**लक्षणायाः साधारणोदाहरणानि यथा -**

**अष्टौ रूढिमत्यो लक्षणाः –**

१. शुद्धा रूढिमती उपादानलक्षणा सारोपा। यथा - अश्वः श्वेतो धावति।

२. शुद्धा रूढिमती उपादानलक्षणा साध्यवसाना। यथा - श्वेतो धावति।

३. शुद्धा रूढिमती लक्षणलक्षणा सारोपा। यथा – कलिङ्गः पुरुषो युध्यते।

४. शुद्धा रूढिमती लक्षणलक्षणा साध्यवसाना। यथा – कलिङ्गः साहसिकः।

५. गौणी रूढिमती उपादानलक्षणा सारोपा। यथा – एतानि तैलानि हेमन्ते सुखानि।

६. गौणी रूढिमती उपादानलक्षणा साध्यवसाना। यथा – तैलानि हेमन्ते सुखानि।

७. गौणी रूढिमती लक्षणलक्षणा सारोपा। यथा – राजा गौडेन्द्रः कण्टकं शोधयति।

८. गौणी रूढिमती लक्षणलक्षणा साध्यवसाना। यथा – राजा कण्टकं शोधयति।

**अष्टौ प्रयोजनवत्यो लक्षणाः –**

1. शुद्धा प्रयोजनवती उपादानलक्षणा सारोपा। यथा – एते कुन्ताः प्रविशन्ति।
2. शुद्धा प्रयोजनवती उपादानलक्षणा साध्यवसाना। यथा – कुन्ताः प्रविशन्ति।
3. शुद्धा प्रयोजनवती लक्षणलक्षणा सारोपा। यथा – आयुर्घृतम्।
4. शुद्धा प्रयोजनवती लक्षणलक्षणा साध्यवसाना। यथा – गङ्गायां घोषः।
5. गौणी प्रयोजनवती उपादानलक्षणा सारोपा। यथा – एते राजकुमाराः गच्छन्ति।
6. गौणी प्रयोजनवती उपादानलक्षणा साध्यवसाना। यथा – राजकुमाराः गच्छन्ति।
7. गौणी प्रयोजनवती लक्षणलक्षणा सारोपा। यथा – गौर्वाहीकः।

गौणी प्रयोजनवती लक्षणलक्षणा साध्यवसाना। यथा – गौर्जल्पति अनेन प्रकारेण विश्वनाथेन लक्षणायाः अशीति भेदाः प्रतिपादिताः। रसगङ्गाधरकारः पण्डितराजः जगन्नाथः लक्षणायाः लक्षणं प्रतिपादयन्नाह – "शक्यसम्बन्धो लक्षणा। "[xix]

शक्यार्थेन सह शक्येतरस्य अर्थस्य सम्बन्धो लक्षणा कथ्यते। शक्येतरस्तु लक्ष्यार्थः। पण्डितराजस्य मतानुसारं तात्पर्यानुपपत्तिः लक्षणायाः बीजम्। अन्यथा काकेभ्यो दधि रक्ष्यताम् इत्यत्र लक्षणायाः प्रवृत्तिः न स्यात्।

मुख्यार्थलक्ष्यार्थयोः सम्बन्धः अनेकविधो भवति। यथा गङ्गायां घोषः इत्यत्र सामीप्यसम्बन्धो विद्यते। आयुर्घृतम् इत्यत्र कारणतासम्बन्धः। सम्बन्धभेदाश्रिता एव लक्षणाभेदाः।

लक्षणा द्विविधा निरूढा प्रयोजनवती चेति। प्रयोजनवती लक्षणा द्विधा गौणशुद्धा चेति। गौणीलक्षणायाः सारोपा साध्यवसाना चेति भेदद्वयं भवति। शुद्धायाः जहत्स्वार्था, अजहत्स्वार्था, सारोपा, साध्यवसाना चेति भेदचतुष्टयं भवति।

एवं सामान्येन यथामतिः लक्षणाशक्तिविचारः उपस्थापितः।

## सन्दर्भग्रन्थसूची-


1. संस्कृतसाहित्येतिहासः – आचार्यलोकमणिदाहालः, चौखम्बाकृष्णदास अकादमी, वाराणसी।
2. संस्कृत साहित्य का अभिनव इतिहास – डा. राधावल्लभ त्रिपाठी, विश्वविद्यालय प्रकाशन वाराणसी।
3. संस्कृत साहित्य का इतिहास – आचार्य वलदेव उपाध्याय, शारदा निकेतन वाराणसी, २२१०१०।
4. साहित्यदर्पणम् (चन्द्रकला संस्कृत-हिन्दी व्याख्योपेतम्) – व्याख्याकारः आचार्य शेषराजशर्मा रेग्मी, चौखम्बा कृष्णदास अकदमी, वाराणसी।
5. काव्यप्रकाशः – झलकीकरोपनाम्ना रामभट्टात्मजेन भट्टवामनाचार्येण विरचितया बालबोधिन्याख्याटीकया समन्वितः, चौखम्बा संस्कृत प्रतिष्ठान दिल्ली।
6. ध्वन्यालोकः (लोचनसहितः, प्रकाश हिन्दीव्याख्योपेतश्च) – व्याख्याकारः आचार्यजगन्नाथपाठकः, चौखम्बा विद्याभवन वाराणसी।
7. रसगङ्गाधरः (चन्द्रिकासंस्कृतहिन्दीव्याखोपेतम्) – व्याख्याकारः श्री मदनमोहनझा, चौखम्बा विद्याभवन वाराणसी।
8. नाट्यशास्त्रम् (नाट्यचन्द्रिका-संस्कृत-हिन्दीव्याखोपेतम्, प्रथमो भागः)- सम्पादिका सुधा रस्तोगी, चौखम्बा कृष्णदास अकादमी, वाराणसी।
9. व्यक्तिविवेकः (मणि-व्याख्यासहितः) – व्याख्याकारः आचार्यः सूर्यमणिरथः, सांविदी-प्रकाशनम्, पुरी।
10. चन्द्रालोकः (हिन्दीसंस्कृतव्याख्योपेतम्) – व्याख्याकारः गङ्गासागररायः, चौखम्बा संस्कृत संस्थान, वाराणसी।


---

[i] वाक्य. १/५६
[ii] महा. १/१/६८
[iii] शब्द.श्लोक. १२
[iv] उद्योत, महा.आ. १
[v] वाक्य. १/११८
[vi] हरिवृषभ, वाक्य. १/११८
[vii] काव्य.प्र. २/५
[viii] तदेव २/६
[ix] सा.द. २/२
[x] तदेव २/३
[xi] सा.द – २/४
[xii] का.प्र – २/९
[xiii] सा.द. – २/५
[xiv] का.प्र. – २/११
[xv] सा.द. – २/३
[xvi] तदेव – २/७
[xvii] सा.द. – पेज ५५ (शशिकला)
[xviii] सा.द – २/१२,१३
[xix] रसगङ्गा. – २